# Narayanaproktam Hari Stotram

# નારાયણપ્રોક્તં હરિસ્તોત્રમ્

## Document Information

Text title : Narayanaproktam Hari Stotram

File name : nArAyaNaproktaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 59/58-72||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# નારાયણપ્રોક્તં હરિસ્તોત્રમ્

સાત્વતાનાં હૃદિ સાક્ષાન્નારાયણો વસામ્યહમ્ ।
નમસ્તસ્મૈ પરેશાય તજ્જલાય નમો નમઃ ॥ ૫૮॥

અનન્તશક્ત્યધિષ્ઠાનાન્તરાત્મઁસ્તે નમો નમઃ ।
અદૃશ્યરૂપિણેઽલક્ષ્યવર્ત્મને બ્રહ્મણે નમઃ ॥ ૫૯॥

દુરીતનાશનેઽખિલપ્રાણિરૂપાય તે નમઃ ।
અસન્નિરસનનામ્ને સાત્ત્વતામ્પતયે નમઃ ॥ ૬૦॥

દીનાનાં બન્ધવે તુભ્યં સ્વધામ્નિ રંસ્યતે નમઃ ।
નિરસ્તાતિશયસામ્યગુણૈશ્વર્યવતે નમઃ ॥ ૬૧॥

અયોગિનાં વિદૂરાય સ્વહૃદિસ્થાય તે નમઃ ।
યત્કીર્તિશ્રવદૃશ્યાર્હા સ્મૃતિસ્તોત્રાણિ સર્વથા ॥ ૬॥

કલ્મષાણિ વિધુન્વન્તિ તસ્મૈ ભદ્રકૃતે નમઃ ।
પ્રપન્ના યત્પદોપાસ્ત્યા માત્રાસ્પૃશિં વિધૂય ચ ॥ ૬૩॥

નિરાશયા બ્રહ્મગતિં યાન્તિ તસ્મૈ ચ તે નમઃ ।
શીલદાનક્રિયામન્ત્રયજ્ઞત્યાગતપોવ્રતાઃ ॥ ૬૪॥

યદર્પણમૃતે ક્ષેમં વિન્દન્તિ ન હિ તે નમઃ ।
શ્વાદમત્સ્યાદચર્મકૃદ્ધવનાઽઽભીરસઙ્કુરાઃ ॥ ૬૫॥

કઙ્કશબરઝલ્લાદપારધિર્ગણિકાપિવાઃ ।
કિરાતખસઘાતાશ્ચ પાપાશ્ચાન્યેઽપિ જન્તવઃ ॥ ૬૬॥

યદાશ્રિતાશ્રયાચ્છીઘ્રં શુદ્ધ્યન્તિ તે નમો નમઃ ।
અવતારમયઃ સોઽયં સાધુસાધ્વીમયઃ પ્રભુઃ ॥ ૬૭॥

ઈશેશાઽજામયો દેવો નારાયણઃ પ્રસીદતામ્ ।
ઋષિપિતૃદેવમયો માનવાસુરનાગધૃક્ ॥ ૬૮॥

પતિપત્નીમયો દેવો નારાયણઃ પ્રસીદતામ્ ।
નરનારીસ્વરૂપોઽયં નૃપરાજ્ઞીમયઃ પ્રભુઃ ॥ ૬૯॥

લોકધામધરાધીહ્રીશ્રીપતિર્મે પ્રસીદતામ્ ।
યત્પાદધ્યાનધૌતાન્તર્હૃદો વિન્દન્તિ યં પ્રભુમ્ ॥ ૭૦॥

તદોતપ્રોતસદ્બુદ્ધ્યા યાદૃગ્રૂપઃ સ દૃશ્યતે ।
તથા તં કવયો લોકે વર્ણયન્તિ પરાત્પરમ્ ॥ ૭૧॥

બ્રહ્મવાણ્યાં બ્રહ્મરૂપો લોકવાણ્યાં રસાત્મકઃ ।
ઉભવાણ્યાં મિષ્ટતિક્તો પ્રસીદતાં કથેષ્ટદઃ ॥ ૭૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૯-અધ્યાયાન્તર્ગતં
નારાયણપ્રોક્તં હરિસ્તોત્રં

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૯/૫૮-૭૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 59/58-72..

Proofread by PSA Easwaran

---

*Narayanaproktam Hari Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*